# संस्कृतवार्ता:

दिनाङ्क :-03.02.2025

प्रात: - 06:55

संयुक्त-संसदीयसमिति:

वक्फ- संशोधन -विधेयकं चतुर्विंशत्यधिक- द्विसहस्रतमवर्षम् आलक्ष्य अद्य लोकसभायां संयुक्तसमित्या: प्रतिवेदनं प्रस्तोष्यते। वक्फ-संशोधन-विधेयके एतस्मिन् संयुक्त-संसदीयसमित्या: अध्यक्ष: जगदम्बिकापाल: भाजपेतिदलसांसदेन सञ्जय-जायसवालेन सह वक्फ-संशोधनविधेयके संयुक्त-समित्या: प्रतिवेदनं प्रस्तोष्यति। असौ संयुक्त-समित्या: समक्षे प्रदत्तानां साक्ष्यानां लेखान्यपि पटले स्थापयिष्यति। प्रतिवेदनामिदं गतमासस्य त्रिंशद्दिनाङ्के लोकसभाया: अध्यक्षाय ओमबिरला-इत्येतस्मै समर्पितम्। वक्फसंशोधन-विधेयके समित्या बुधवासरे नवविंशतिदिनाङ्के प्रारूप-प्रतिवेदनं संशोधितञ्च विधेयकं अङ्गीकृतम् परञ्च विपक्षदलीया: नेतार: प्रतिवेदने स्वीय-असहमतिं प्रकटितवन्त:। संयुक्तसंसदीयसमित्या पूर्वे पञ्चनवत्यधिक-नवदशतमं वर्षे वक्फविधेयकं चतुर्दश-खण्डेषु धारासु अथ च पञ्चविंशति-संशोधनै: सह स्वीकृति: प्रदत्तासीत्। तत्रैव संसद: अर्थ-सङ्कल्पनासत्रम् अप्रैलमासस्य चतुर्थदिनाङ्कं यावत् प्रचलिष्यति।

दिल्ली- विधानसभा

दिल्ली-विधानसभा- निर्वाचनप्रचारस्य अद्य अन्तिमं दिनं वर्तते। भाजपा-आप-कांग्रेस -इत्येतेषां दलानां प्रमुखनेतार: मतदातृन् आक्रष्टुं नैका: जनसभा: कुर्वन्ति। निर्वाचन-समराङ्गणे आहत्य नवनवत्यधिक- षड्शत-सङ्ख्यका: प्रत्याशिन: स्पर्धामाना: वर्तन्ते। सप्तति-सदस्यात्मिकीयायै दिल्ली-विधानसभायै निवार्चनं बुधवासरे भविष्यति तत्रैव मतगणना च शनिवासरे भविष्यति। दिल्ल्यां भाजपा-आम-आदमी-पार्टी-कांग्रेस-इत्येतेषां दलानां मध्ये त्रिकोणात्मकी प्रतिस्पर्धा जायमाना वर्तते। राष्ट्रिय-राजधान्यां षष्ट्यधिक-सप्तशतोत्तर-त्रयोदश-सहस्रं यावत् मतदानकेन्द्रेषु मतदानं सुनिश्चितं वर्तते। अत्रावसरे

निर्वाचनायोगोऽपि मतदातॄणां सहभागित्वं सुनिश्चितुं विभिन्नान् मतदातृ- अनुकूलोपयान् सम्पादयति।

महाकुभः-अमृतस्नानम्

उत्तरप्रदेशे प्रयागराजे वसन्त- पञ्चम्याः शुभावसरे महाकुम्भस्य तृतीयम् अमृतस्नानं प्रचलति। अमृतस्नानं महाकुम्भस्य एकं विशिष्टं पुण्ययुतं पवित्रानुष्ठानं भारतीय सनातनधर्मे विद्यते। प्रथमम् अमृतस्नानं मकरसंक्रांतौ अपरत्र द्वितीयम् अमृतस्नानं मौनी-अमावस्यायां नवविंशति- दिनाङ्के परिपालितम्। त्रयोदशसु अखाडासमूहेषु प्रत्येकं अखाड़ासमूहः निधारितसमयस्य क्रमस्य च सूचनां प्रदत्तवन्तः। महानिर्वाणी- पञ्चयती-अखाड़ा समूहः शम्भू-पञ्चायती-अटल-अखाडा-समूहः च अद्य प्रातःकाल त्रिवेण्यां सङ्गमे पवित्रावगाहनं कृतवन्तौ। सुरक्षां सुनिश्चेतुं अर्द्धसैन्यबलानि समेत्य पञ्चाशत्सहस्रं यावच्च आरक्षि-कर्मिणः मेलकक्षेत्रे नियुक्ताः सन्ति।

प्रशासन-वित्तीयवितरणम्

प्रशासनेन गहनसागरीय क्षेत्रेस्य अन्वेषणक्रमे प्रौद्योगिकीं विकासयितुम् अस्य वर्षस्य अर्थसङ्कल्पनापत्रे समुद्रयान- अभियानाय षष्टिशत-कोटि-रूप्यकाणि आवण्टितानि। अपरत्र वित्तमन्त्रिणा ऋत्वाधरित- पूर्वानुमानानां क्षमतां संवर्धयितुं पृथ्वी-विज्ञान-मन्त्रालयस्य पदक्षेपाय मिशनमौसम-इत्येतस्मै नवविंशत्यधिक-त्रिशतोत्तरैकसहस्र-कोटिरूप्यकाणि आवण्टितानि।

क्रिकेटिति

पुरूषाणां विंशतिप्रतिविंशति- क्रिकेट-प्रतिस्पर्धायां भारतेन गतरात्रौ मु मुम्ब्याः: वानखेडे-क्रिकेट-क्रीडाङ्गणे श्रृङ्खलायाः पञ्चाशदधिकैकशत धावनाङ्कैः पराजितम्। एतेन साकमेव भारतीयदलं पञ्चश्रृङ्खलानां प्रतिस्पर्धां चत्वारि एकम् इत्यङ्न्कान्तरालेन विजितवत्।

इति वार्ताः